Title अपशब्दनिराकरणम्

Author

Extent ६ Age

Subject न्यायवैशेषिकम् · सम्पूर्णम्

नं० ६४०-घ

पत्र ६

अपशब्दनिराकरणम् (न्याय वैशेषिकम्)
पत्राणि ६ (सम्पूर्णम्)
नं० ६४०-घ

पत्र ६

६

नं० ६४०-च

अपशब्दनिराकरणम् (न्यायवैशेषिकम्)

पत्राणि ६ (सम्पूर्णम्)

या

ॐ नमो गणपतये ॥ अपशब्दत्वं कुत इत्येवं यद्भवद्भिरुक्तं तदेव तावद्विचार्यते कथमयमपशब्दः किं श
ब्दलक्षणरहितत्वात् आहोस्विदर्थप्रतिपत्त्यसाधनत्वादिति किंचातः यदि तावच्छब्दलक्षणरहितत्वादय
मपशब्द इत्येवं वक्तुमभिप्रेतं तदयुक्तं शब्दलक्षणोपपन्नत्वेन प्रतीयमानत्वात् तथा हि श्रोत्रग्रहणलक्षणः
सामान्यवानर्थः शब्द इति महसंज्ञावाज्ञावविशेषज्ञाः तल्लक्षणोपपन्नत्वं चास्य सकलजनसाक्षिकत्वेन प्रती
यत एव अन्यथा हि तत्संज्ञावसिद्धिरेव न स्यात् तन्नायमपशब्दत्वेनाभिमतः शब्दः श्रोत्रादन्येन प्रतिपन्नेण
कान इति अथैवं कदाचिन्निगद्यते किल व्याकरणप्रणेतृभिराचार्यैः पाणिनिप्रभृतिभिः साधुशब्दानां ल
क्षणं प्रोक्तं न तद्रहितत्वेनायमपशब्द इति तदेतदप्यसाधीयः तथा हि व्याकरणप्रणेतृभिराचार्यैः किं शब्दानां
सामान्यलक्षणं प्रोक्तमाहोस्विद्विशेषलक्षणमुभयं वा तत्र तावत्सामान्यलक्षणं प्रणीतं श्रोत्रग्राह्यत्ववद
प्रतिभासनान्न व्याकरणकृत्प्रणीतं सामान्यवतः श्रोत्रग्राह्यत्वं सर्वशब्दानां सामान्यलक्षणं प्रमाणेनोप
लभ्यते नैवं साधुशब्दानामपि शेषव्यञ्जनगतं किंचिदेकं सामान्यभूतं व्याकरणप्रणेतृभिराचार्यैः प्रणीत
लक्षणमुपलब्धिगोचरतामुपगच्छति तथा हि समालक्षणेन वाकेषु लिवाकलक्षणेन च समासेषु त।
थाक्रियालक्षणेन कारकेष्वाख्यातकलक्षणेन च क्रियास्वित्येवं संधिविग्रहकृत्तद्धितादिलक्षणाना
मप्यन्योन्यवर्गाव्यापकत्वेनासामान्यात्मनानुपपत्तेरितिपतनेनोभयलक्षणप्रणीतत्वं प्रस्तुते सामान्यलक्षण।

श्री १

संभवेऽभयलक्षणाव्यवहारोपि दुर्घट एवेति अथ विशेषणलक्षणमेव साधुशब्दानां पाणिनिभृतिभिः प्रणी-
तं न द्रहितत्वेनायमपशब्दः इत्येवं कदाचिद्दं भणीषितदस्त्यनुपपन्नमेव यस्माद्धि विशेषलक्षणरहितत्वेन विशेष-
व्यवहारप्रवर्तनिवार्यतां न शब्दत्वे साधुत्वे वा न हि तल्लक्षणरहितत्वेन वक्तुमस्त न हि तद्व्यवहारप्रवर्तननिवर्त्तते शब्दत्वं सा-
धुत्वं वेति यथा वा सत्यत्वलक्षणरहितत्वेनानुमानादेः प्रत्यक्षव्यवहारप्रव नयुक्तो न तत्प्रमाणव्यवहारोपीति न।
स्माद्यथा प्रमाणसैर्निर्गदितैः प्रमासाधनत्वं सकलप्रमाणव्यक्त्यनुगतमप्रमाणव्यावृत्तं प्रमाणसामान्यलक्षणं
यत्सत्त्वासत्त्वाभ्यां प्रमाणतदाभासत्वेन विशेषव्यवस्थापनमुपपद्यते न तद्वच्छब्दव्यक्त्यनुगतमप-
शब्दव्यावृत्तं शब्दसामान्यलक्षणं वक्तुं यत्सत्त्वासत्त्वाभ्यां शब्दापशब्दप्रविभागो व्यवतिष्ठेत न च तथा
लक्षणाभिधायि व्याकरणशास्त्रप्रणेतृभिः किंचिदपि सूत्रं पश्यामस्तत्र व्याकरणप्रणेतृप्रणीतलक्षणरहित-
त्वेनाप्यस्यापशब्दत्वमिति अथ समस्तसाधुशब्दानुगतमपशब्दव्यावृत्तं साधुत्वं नाम सामान्यमेव साधुशब्दानां
लक्षणं कश्चिद्व्याचक्षीत न तदेतदस्मन्निरूपितार्थाभिधाने न तत्त्वल्साधुत्वसंज्ञके सामान्ये स्वयमसिद्धमर्थंकं
कथमन्यस्य व्यवस्थापकं स्यात् न हि हि तत्सत्त्वे प्रमाणं किंचित्पश्यामः न चाहिनातावदत्र व्याप्ताव्यञ्जे वि-
ज्ञाने साधुत्वमात्मानं प्रकटयति यथा कृत्तगादिजनिते विज्ञाने चटत्वशुक्लत्वरीत्यादिनीलत्वमधुरत्वासित्वा-
दिव सामान्यमजातीयेष्ववान्तरभेदभिन्नेष्वप्यनुगतं सजातीयेभ्यो व्यावृत्तं च प्रतिभातीति नैवं साधुत्वं नाम सामान्य

नुगतत्वावृत्ते प्रत्ययानुरूपमतियत्नहेतोऽपि व्यक्तास्ति यदि च महत्त्वं साधुत्वं सामान्यं स्यात्तदा भवति शब्दे पचतिशब्दे वा
साधुशब्दोऽयमित्येवं समयग्रहणमति प्रसिद्धेष्वपि साधुशब्देषु श्रूयमाणेषु साधुशब्दोऽयमिति प्रतीतिः प्रादुर्भवेत्
त्वक्त्वगवादिषु प्रतीतिवच्चैव तथा भवति तस्मान्न साधुत्वं नाम सामान्यं प्रत्यक्षगोचरं नामापाद्य कदाचिदप्यात्मानं प्रकट
यति यत्तल्लिङ्गनिषेधादनुमानमपि निषिद्धं दृष्टं ह्यन्वयादिना लिंगसंबन्धस्यानुमानमशक्यत्वात् सामान्यतो
दृष्टमनुमानमत्र न संभवत्येव सामान्येनापि तत्प्रतिबद्धकार्यादिलिङ्गानुपलम्भादिति अथागमादेव साधुत्वम
वगम्यत इत्येवं कदाचिदिहालपितं तदेतदपि न प्रमाणं हि स्मृतमनुसंबद्धः प्रमाणैः क्रियते न ह्युभयवादिविप्रतिपन्न
विषयः कश्चिदागमोऽपि साधुत्वसद्भावावेदक उपलभ्यते यतः साधुत्वविनिश्चयः प्रादुर्भावमासादयेद्यत्वन्मा
त्रस्य च सर्वत्रसुलभत्वात् ततो विवादश्चोच तत्त्वज्ञाप्यविनिश्चयः सेवतीति नागमादपि साधुत्वाधिगमः कर्तुं श
क्य इति अथ कदाचिदूर्ध्वं साधनत्वान्यथानुपपत्तिः साधुत्वं निश्चीयत इत्येवं तारदीषितं तदपि न प्रमाणदृष्टि
गोचरतामवतरति यतः प्रतिभाति नहि केषुचिच्छुद्धेषु समभ्यस्यमानेषु धर्म उत्पद्यमानः संलक्ष्यते तत्सततियत्नम
मिमतापि प्रपाद्यते यतः केषांचिदेव शब्दानां धर्मसाधनत्वावगमपूर्वकः साधुत्वनिश्चयः प्रादुर्भवेत् यदा
दि साधनत्वावगमपूर्वकश्शुभकारित्वविनिश्चयो भवेदिति यत्तु नैव तैः कश्चिद्विवाद्यते किलापशब्दं कुर्वतोऽस्तु
नः प्रत्यभवं प्रामाणमित्येवं श्रूयते इत्येतेन शब्दानामदृष्टत्वात्साधुशब्दापवर्गे धर्मे दृष्ट इत्यवधार्यते इति तदप्यसा

श्री पुनरयं युक्तिमज्ञानभावितं मन्यमानोऽयमिति भाति न खलु कथाकथनमात्रेणार्थविशेषं प्रतिविशति पद्यमानः प्रतिवादी सम्य
२ क्तिपत्तिविषयमाने तत्पाये तद्इति विपरीतानामपि हि कथां रचयित्वा कथयितुं शक्यानन्तपत्यस्त्वेतो गित प्रत्यादाविद्वेषह
तेन वाग्व्यवहारकाले अपि वा अपशब्दं कुर्वतां यद्यधर्मः प्रादुर्भवति तदानीं येनावश्यं साधुशब्दानभिज्ञास्तेषामसंस्कृतशब्दप्र
योगात्सततमधर्मोत्पत्तिः प्राप्नोति येन संस्कृतशब्दाभिज्ञास्तेऽपि व्यवहारकाले प्रायेणावदसंस्कृतमेव शब्दं प्रयु
ञ्जाना दृश्यन्ते ततस्तेषामपि प्रभूतोऽत्यन्तविपरीतधर्मस्तेनानेकापशब्दधर्मबहुलः पुरुषो भवेत् अथ यानर्थं येन प्रोक्ति
तव्यमिति वचनादेतद्वैयासेवासाधुशब्दोऽभ्युपगमात् धर्मः साधुशब्दोच्चारणात् धर्मं इत्यपि पक्षः स्वीक्रियते तदा
नीमेतद्वैयाकरणशब्दापशब्दप्रविभागः प्राप्नोति न वादादिकाले तदा धर्माधर्मसाधनत्वाभावादिति अथ कदा
चिदेवमन्यसे यथैकत्र पचनादिक्रियां कुर्वतो दृष्टाः पाचकादयस्तेऽन्यत्रापि पचनादिक्रियां न कुर्वन्ति तत्रापि पा
चकादयपदवाच्यत्वेन तदाभासाः तथा तद्वैयाकरणधर्मं कुर्वन्ति तेऽन्यत्राधर्ममकुर्वतोऽपि साधुशब्दपदनिर्गद्यन्ते येऽत्र
तद्वैयाकरणधर्मं कुर्वन्ति तेऽन्यत्राधर्ममकुर्वतोऽपि असाधुशब्दा भवन्ति तदेतदप्यविचारितार्थाभिधानम् यतः प
चनादिक्रियां तावत् क्वचिन्निष्पन्नमेव पुरुषविशेषः सद्व्यापारभावव्यतिरेकाविना कारयन्तः केचिदुपलभ्यन्ता
दृश्यन्ते पुरुषविशेषा नक्रिया विशेषनिमित्तेन पाचकादिव्यपदेशं लभ्यन्त्यदानन्यसाधारणानि तिलकपु
लकादिविशेषदर्शनाद्यंचिह्नं करद्रव्यमादिव्यपदेशभाजो भवन्तीति पुरुषमनत नत्वेवमत्र वैयाकरणेषाचि। २

शब्दानां व्यापारादन्वयव्यतिरेकाभ्यां धर्मोत्पत्तिः केषांचिद्व्यापारान्वयव्यतिरेकानुविधानादधर्मोत्पत्तिः कदाचिदप
लक्ष्यायनस्तन्निमित्तेन शब्दविशेषाः साधुशब्दत्वमपशब्दत्वं च प्राप्यान्यदान्यत्रापि न हि शेषोपलंभान्नव्यवहार
विषयभावं प्रतिपद्यन्ते न त्वेवं केषांचिन्नियतो निर्भवेनोहृश्यन्ते यस्माद्धेरित्यादयो भवन्ति न्यादयस्थनामाख्यातादिशब्द
विशेषा धर्ममेव जनयन्तोऽस्माभिः श्रागुपलब्धास्तस्मादेते साधुशब्दा एव यस्मा गावीगोणीगोपोतलिकेत्यादि
शब्दाश्च धर्ममेव जनयन्तो दृष्टाः तस्मादेतेऽपशब्दा एवेति ननु यद्यपि प्रमत्वादनुमानाद्वा तेषां प्रतीतिर्भवति तथा
पि शक्तार्थाप्रतीतेर्भवत्येव तथा हि ह्येतेनैवैषां न म्लेच्छितव्यमित्ययं प्रतिषेधोऽपशब्दानामधर्मसाधनत्वं प्रतिपादयति
यथा ब्राह्मणो न हन्तव्यः पद्भ्यां गौर्न स्पष्टव्य इत्येवमादिः प्रतिषेधो ब्राह्मणहननादेरधर्मसाधनत्वं सूचयति म्ले।
च्छितशब्दानामेव प्रतिषेधादर्थापत्तितः साधुशब्दानां धर्मसाधनत्वसिद्धमिति भवतु नामैवं तथापि केते म्लेच्छि
तशब्दाः केवा म्लेच्छितशब्दा इत्यनिश्चिते संशयो विशेषप्रतिपादकप्रमाणाभावान्न ह्येतेनैवैषां न म्लेच्छितव्यमित्येत
स्मादेव वाक्यादेते म्लेच्छितशब्दा इत्युच्यन्ते ननु के तेऽपशब्दा इत्यनदेव विचारणीयं शास्त्रमधर्महेतुत्वेन श्रवश
ब्दप्रतिपत्त्याविनेरनर्गप्रयत्नं दुष्करत्वमापन्नीपद्यते उच्यते यावन्नापशब्दत्वं प्रतीयते तावन्नाधर्मसाधनत्वं यावच्च
न्नाधर्मसाधनत्वं प्रतीयते तावन्नापशब्दत्वमिति यथा यावन्न धर्मसाधनत्वं प्रतीयते तावन्न साधुत्वं यावन्न साधुत्वं प्रती
यते तावन्न धर्मसाधनत्वमिति अपि च धर्मसाधनत्वमपि सहकारिविशेषसापेक्षे सत्यधर्मसाधने कदाचिद्भवति

श्री. यथा गृहस्थस्य स्वाध्वर्विणोः स्वभार्याया मृतुकाले गच्छतो वै मैथुनं धर्मसाधनं न देशकालानवेक्षस्यापि धर्मसाधनं यत्र यागा
३ विशेषेणैव विशिष्टस्य पत्नोः प्रसापणं धर्मसाधनं न देशकालातिक्रमेण धर्मसाधनं नादिष्टं प्रज्ञाशुपगृहीतं धर्मसाध
3 नमन्यथा न धर्मसाधनं भवति ततश्चान्वेषां येशब्दाः धर्मं कुर्वतः साधवः संजातास्तेन्यत्र न चैव सामग्री विपर्ययेण धर्म
कुर्वतः पशुवधादिवत्साधवो भविष्यंतीत्यत एवापशब्दापशब्दव्यवस्थानुपपत्तिः किंच श्वनेर्वेधामपियदि संस्कृतश
ब्दैमैव सत्त्रिय यजमानवेदादिनिन्दां करोत्यसत्यमसंस्कृतं वा ब्रवीति तदा किमधर्मो न भवति किं वा तेप्यपशब्दा एवे।
तितस्मान्न धर्मो धर्मसाधनत्वेनापि शब्दापशब्दव्यवस्थाक्रियातोयश्च क्रमर्थप्रतिपत्साधनत्वादपशब्द इति तद
पि नुपपन्नं गावीत्यादिशब्देभ्योपि केषांचिदर्थप्रतिपत्तिदर्शनात् सर्वपुरुषाणां तु गोरित्यादिशब्देभ्यापि नार्थप्रति
पत्तिर्भवति अप्रसिद्धसमयानामर्थप्रतीत्यसंभवाद्धिति अथ कदाचिदेवं प्रतिसमाधीयते गावीगोणीत्येवमादिशब्दे
भ्योर्थप्रतीतिपारम्पर्येण प्रदानमासादयंति ततः साक्षात् तथा हि गावीशब्दाद्गोशब्दः स्मर्यते ततो भवति ततः स्व
रूपस्यापि ताद्गोशब्दादेव ककुदादिमत्यर्थे प्रतीतिर्भवति अयं क्रमः शब्दवद्भिरप्यायत इति तदेतदपि प्रमाण
शून्यत्वेन विरलपितं नत्वपशब्दान्साधुशब्दे नावस्थतीति : ततोर्थप्रतिपत्तिरिति तस्मिन्क्रमे प्रमाणं किंचित्पश्या
मः किं च यस्तावद्भ्रंशं पशब्दं च प्रतिजानाति स पदं प्रतिगयतोऽयेनस्त्रीशूद्रादयस्तेनकथमपशब्दाच्छुद्धं प्रति
पद्यतेनोर्थं प्रतिपद्यंते दृष्टानभववेदिनोपि स्त्रीशूद्रे गावीत्यादिशब्देभ्योर्थं प्रतीतिरित्यदोपारम्पर्येण गावीत्या ३

दिषाशात्कृत्वादिमदर्थप्रतीतिरिति यदि च गावीत्यादिशब्दानामर्थप्रतिपत्तिजनने सामर्थ्यमस्ति न तावच्छब्दाः शिष्टैर्व
गोशब्दादिस्मृतिजनकत्वमपि न स्यात् न च प्रतिबद्धार्थदर्शनादन्यच्छस्मृतिर्भवितुमर्हति यदि लोकार्थवाचकत्वेन न तयोः
शब्दापशब्दयोः स्यान्न दोषः यदि वेदितोऽपशब्दस्मरणाच्छब्दस्मृतिर्भवितेत्युक्तम् भशब्दस्य वर्णाद्युदयस्मृतिवत् तथा चैव।
गोण्यादिगोशब्दयोः पर्यायत्वमेव स्यात् ननु द्वयोरपि साक्षादेवार्थप्रतिपादकत्वे न पुनरपशब्दानां साधुशब्दप्रति
पादनक्रमेणार्थप्रतिपादकत्वमित्यत्र न्यायः कश्चिदस्ति साक्षादर्थप्रतिपादनसामर्थ्ये हि अपशब्दानां साधुशब्द
प्रतिपादनेऽप्यसामर्थ्यं न ह्यर्थेऽपशब्दानां वाचकत्वं नामान्यदेव न हि विषयप्रतीतिजनकत्वमुक्तम् एतच्चापर्यायापशब्दाः
स्साधुशब्देषु प्रतीतिं जनयन्ति न तेऽर्थेष्वेव किं न जनयन्ति न ह्यर्थभोगयोगे किंचिद्रूपं प्रयोजकं येन तेऽर्थानभिरिहेतुः
तथा हि न तावदकृतसमयाप्यपशब्दाः साधुशब्देष्वपि प्रदीपवत् स्वभावतः प्रतीतिं जनयन्ति अदर्शनादतिप्र
संगात् कृतसमयसामर्थ्याच्चेदाजनयन्ति तेऽर्थेष्वेव किं न जनयन्ति एवं हि प्रतिपत्तिपरम्परायासश्रमः परिहृतो भवति अ
पि च अपशब्दाः साधुप्रतीतिरिति त्ववहदृष्टविपरीतं भवद्भिः परिकल्पितं यस्मात् संस्कृतशब्देभ्योऽर्थप्रतिपत्तिम्लेच्छतो
ऽपभ्रंशेनैव बहुलं सुल्यायमानाइहदेहमलो दृश्यते इति नः साक्षादर्थप्रतिपादकत्वाप्रतिपादकत्वविशेषादपि
शब्दापशब्दव्यवस्थेति अथ वाचकत्वाविदत्वं मन्येथाः संस्कृतेन तत्प्रविभागपत्र शब्दापशब्दव्यवस्थाहेतुरिष्यते उ
च्यते तदप्यनुपपन्नं यतः संस्कारयोगेन हि संस्कृतं वस्त्वभिधीयते संस्कृतत्वं जनने संस्कृतः पुरुषः संस्कृतं यत्नोप

श्री· कर्णानामित्येवमादि न चाभिमतानां शास्त्राणां संस्कारः कश्चित्संभवति तथा हि न तावद्देशादिङ्गलवर्णादि
५ भिर्व्यञ्जनवत्संस्कारः संभावयितुं शक्यते नापि शुष्कवस्त्रज्ञानवाङ्कुरक्षेत्रस्यादिसंस्कारैः केषाञ्चिच्छास्त्राणामुपक्र
मः नाप्येकान्तेन गौतृणपूर्ववीणादिवत् निर्विशेषव्यञ्जकव्यक्तानां संस्कारः संस्कृतानामभिमतानामपि शास्त्राणां केषां
चिद् ध्रुवत्वात् संस्कृतानामभिमतानामपि केषाञ्चिच्छब्दवत्त्वात् प्रयत्नायत्ने कश्चिदतिशयः नापि मन्त्रयज्ञोपक
रणवद्धर्मसाधनतामीयात् संस्कारः संभवति मिथ्यावृत्तिचोरनास्तिकवचनेभ्यः संस्कृतेभ्योऽपि धर्मनिष्पत्तेः
शिष्टाहिंसासत्यवचनादिगुणयुक्तेभ्योऽपशब्देभ्योऽपि धर्मोत्पत्तेः न च वचनमात्रमागममात्रियन्ते युक्तिज्ञास्तस्मान्नासं
स्कृतानां कश्चिदस्तीति न त्वेवं यदि संस्कृतासंस्कृतविभागो नास्त्येवेत्यभ्युपगम्यते ततोऽपशब्दव्याव
च्छेदेन संस्कृतशब्दलक्षणार्थं व्याकरणं पाणिनिप्रभृतिभिः प्रणीतं तदनर्थकमेव तदानीं संपद्यत
इति न तेन महत्त्वात्संभाषितेन न खलु महतां नामयमनुपालम्भः संभवति तेषामयमनुपालम्भः स्याद्यदि युक्तिसमा
ह्येव शास्त्रान्न व्याख्यानमभ्युपगच्छति यतः संस्कृतशास्त्रसंभवेन दन्त्याख्यानं च व्याकरणशास्त्रान्व्याख्यानव
द्बुद्धिपूर्वकतामेव सूचयति संस्कृतशास्त्रासंभवे त्वस्या संस्कारादित्वके ये पिशिष्टप्रयोगपरसंस्कारास्या
द्भूतेरपि वर्ण्यं के उच्छिष्टा इति परित्याव हि दितव यत्नादिगुणयुक्तत्वात् किमर्थं तेषामयमलीनिर्वेधोऽ
नेशेरोत्कर्षमनपेक्ष्य वास्त्रेव शास्त्रान्वयुते नापजनिति यथा विचारकाय एव केवलपुरुषाः शिष्यतयामि ५

येतास्तदानींतनहृदयनं प्रमाणं तैः प्रमाणीकर्तुं युक्तमिति अथ काव्यप्रणेतारः कालिदासप्रभृतयः प्रत्यशि
ष्टास्तैः प्रयुक्ताः अपभ्रंशशब्दाः संस्कृततामासादयंति इत्येवं शंकितुं समाधातुं प्रयायमीषितज्ञाव्येवं भवता वक्तव्यं किंप
विगणिताः केचिद्वा अत्र काव्यकृतः प्रमाणीकर्तुमभिप्रेतास्तनास्तैः शब्दाः काव्यकर्त्तार इति तथाहि नावद्यायाः
पदः कर्त्ती क्रियते तदा तेषां वशं कालिदासादिभिर्व्यवहारकाले गावीगोणीत्यादयः शब्दाः संप्रयुक्तास्तेपि
शब्दाः संस्कृततामश्नुवीरन् न वा अत्र प्रमाणं किंचिदस्ति व्यवहारकाले तैर्गावीत्यादयः शब्दा नैव प्रयुक्ता इति
विपर्ययस्तु संभाव्यते यतः प्रयोग व्यवहारकाले वार्त्तमानिकाः सर्वेपि विपश्चितोपशब्दैरेव व्यवहारं कुर्वो
दृश्यंते इति अथ काव्येष्वेव तैर्ये प्रयुक्ताः शब्दास्त्वपभ्रंशसंस्कृता इत्युच्यंते तदाभिमताशेषसंस्कृतशब्दव्यामि
प्राप्नोति न वै हि पवित्रगणितेषु काव्येषु समस्तु थान प्रत्यय प्रत्यादितानां शब्दानां प्रयोगः संभावनापदवी
मुपसर्पति अथ सर्वकाव्यकर्त्तारो अत्र शिष्टाः नैर्थ किंचित्काव्यकृतं तत्र ये केचन शब्दाः प्रयुक्तास्ते सर्वे संस्कृ
ता एवेत्ययं पक्षः स्वाभ्युपगमविषयभवनार्थिनेन तदानीं वेज्ज इयेज्ञ इत्यादिशब्दानामभीमकाव्यादिषु प्रसि
द्धानां संस्कृतप्रसंगोनिष्टः समासज्यते यदि पुनः संस्कृतकाव्येष्वेव ये प्रयुक्ताः शब्दास्त्वपभ्रंशसंस्कृता इत्यनि
ष्टप्रसंगप्रहीणतयायं पक्षः समाश्रीयते इदानीमिति तेन वाच्ययुक्तदोषप्रसंगोपि स्यात् - ज्ञाते यावच्छिष्टशब्दानां सं
स्कृतत्वेन सिद्धानितावत्र संस्कृतशब्दनिबद्धत्वेन काव्यानां संस्कृतत्वसिद्धिः यावच्च काव्यानां संस्कृतत्वेन

श्री· सिद्धान्तितावद्व्रतस्य युक्तत्वेन शब्दानां संस्कृतत्वसिद्धिरिति अपि च संस्कृतत्वेनाभिमतेषु काव्येषु शास्त्रेषु च चिरंतन
५ नेष्वपि केषुचिदपशब्दाः केषांचिद्वैयाकरणैरुद्भाव्यमानानां दृश्यन्ते तत्कथमेकांतेन काव्येषु शास्त्रेषु वा ये केचित्प्रयुक्ताः
5 शब्दास्ते संस्कृता एवेति अथ व्याकरणसूत्रकारादय एवाप्तशिष्टास्तैर्ये शब्दाः प्रकृतिप्रत्ययलोपागमगुणवृद्धिनिपातो
पसर्गादिलक्षणद्वारेण व्युत्पादितास्त एव संस्कृतास्तद्विलक्षणास्त्वपशब्दा एवेति अयं निश्चयश्चिरकालम
वतस्थ्वतस्मिन्नरीनृत्यते अत्राप्येवं पृष्टेन भवता वक्तव्यं किं लक्ष्यानुरोधेन लक्षणव्यवस्थापरमभिमतमुताहो ल
क्षणानुरोधेन लक्ष्यव्यवस्थापनमंगीक्रियते इति तत्र यदि तावदाद्यः पक्षः तदानीं लक्ष्यभूताः शब्दास्तावदादौ प्रति
पत्तव्याः अन्यथा हि कथं तदनुरोधेन लक्षणव्यवस्थितिः स्यात् प्रथममाम्नायादिष्वनिपन्नाश्चैव विद्दिन तदनुरोधेनाग्नि
गवादिव्यवस्थापनं दृष्टं नान्यथेति लक्ष्यभूताश्चेदादौ शब्दा निश्चितास्तदा लक्षणव्यवस्थापनमिदानीं कोप
युज्यते परम्परानुरोधेनोभयव्यवस्थापने ऊर्वीणस्त्वमितरेतराश्रयप्रसंगेनोपपद्यते अथ लक्षणानुरोधे
नैव लक्ष्यव्यवस्थापनं चिकीर्षसि तदा कर्मण्यणित्यादिलक्षणोपपन्ने राद्विरथश्रीग्रामयामश्च पाद्योपि शब्दाः साध
वः प्रसज्यन्ते न चैते वैयाकरणैः साधव इष्यन्ते तस्मादतिव्यापकत्वादलक्षणं यथाश्राणिवर्गो लक्षणमिति तदा
न्यान्यपि लक्षणान्यव्याप्त्यादिदोषदुष्टत्वादलक्षणान्येव द्रष्टव्यानि यदि पुनर्बहुशान्येव व्याकरणशास्त्राणि प्रदि
ष्टानि सर्वाणि शब्दलक्षणानि भवेयुः तदानीं वक्तव्योपसंख्यानेष्टयो व्याख्यातृभिर्नाश्रीयेरन् निष्प्रयोजन ५

नन्वादिति अथ स्तु कारेणैव वा शब्दादिभिः संशब्दीनां पते यद्धा येव क्रव्यादिभिः भुत्वादिता इत्येवं प्रत्यवुध्या
तमुपवेक्षमीषि यद्येवं गावी गोण्यादयो पि शब्दवाशब्दवशब्दादिभिः संशब्दीना इत्येवं तु वाणाः कथं निवार्यते
व्याख्यानतो विशेषप्रतिपत्तिरित्येतदप्यसङ्गतम् द पिंमपुं आइं कसिं इत्यादिशब्दाः केश्चिद्व्याख्यातृभिः सा
धुत्वेन व्याख्याताः केश्चित्तु न रसाधुत्वेनेति केषामज्ञामतत्वं संभावयामः शिष्टप्रयोगसंगदादपि न विशेषप्रति
पत्तिः यानयार्थिकाव्युत्पत्तत्व हानोत्र शिष्टाप्रभिप्रेताः तत्त्वपुरुषा अपि केचिच्छब्दाः केचिदपशब्दा एव निग
द्यन्ते अन्यथानकश्चिदपशब्दः स्यात् कस्यचित्केषुचित्काव्येषु प्रयुक्तत्वात् न नन्वात्काव्यानां कस्यापि श
ब्दस्य प्रयुक्तत्वं वक्तुमशक्यमिति अथ भुति ते येण येशब्दा भुत्वादिना त एव संस्कृता को त्र शुद्धेयवाकः
साक्षीयते त्वेषामेव सन्नित्वं निश्चिनमः तद्भुत्वादिनानामेव शब्दानां संस्कृतत्वं चेति न च प्रकृतिप्रत्यय
लोपागमादिलक्षणयोगित्वेन भुत्वादनमात्रं शब्दानां प्रकृतिप्रत्ययादिलक्षणयोगित्वेन भुत्वादनात्
संस्कृतत्वप्रसंगः स्यात् अथ भवतीत्यादिशब्दानां याहेरभूते न लक्षणेन भुत्वादनं कृतं ननु तादृग्भूतेन लक्ष
णेन भुत्वादनं न तादृग्भूतेन भुवइ इत्यादिशब्दानां तेन भवत्यादय एव शब्दाः संस्कृता भण्यन्ते न भुवइ इत्यादय इति
न देतदपि यत्किंचित् तथाहि यादृग्भूतेन लक्षणेन भुवइ इत्यादिशब्दा एव संस्कृता इष्यन्ते न भवतीत्यादय
इत्येवमपि भणितो न सम्यग्वक्तुं भवति इति ननु भवतीत्यादिशब्दानां संस्कृतात्वेव लोके प्रसिद्धा भुवइ इत्यादि

श्री· प्राकृतानां तु प्राकृतनाम्नैवेति तत्कथं संस्कृतप्राकृतसंज्ञयोर्विविक्तविषयत्वेन प्रसिद्धिः प्राकृताकारेण तस्यान्यद
विद्धकर्णाटादिभाषाणां व्यत्ययेन प्रसिद्धिः कुतः प्राकृतानामिति यथैवं द्रविडान्ध्रकर्णाटादिभाषाभेदवत्संस्कृत।
१ प्राकृतभाषाभेदोऽपि लोकप्रसिद्ध एव प्रतिपन्नस्तेन व्याकरणेन किं वित्तप्रयोजनम् नहि प्रतिदेशं भाषाणां ल
6 क्षणशास्त्रं किंचिदस्ति नापि तदन्तरेण तद्भेदो न प्रतीयत इति अपि च संस्कृतलक्षणरहितत्वेन संस्कृतप्राकृतभ
वेऽप्यैवमिष्यते नापशब्दो नाम कश्चिदस्तीति अपि च लोकेऽपि विप्रतिपत्तिविषयं गोभूमिस्वर्णादिकं यः प्रमा
णेन साधयितुं शक्नोति तस्य यथाप्रसिद्धं न केनापि शब्देनन्यायं कुर्वतः प्राड्विवाकेनापि जयपत्रं हस्तेनैव परा
जयः बौद्धदर्शनेऽपि असमर्थनाङ्गवचनं दोषोद्भावनं द्वयोर्निग्रहस्थानमित्युक्तं न तत्रापशब्दो नाम महर्षिणा व्या
ख्यातम् न्यायशास्त्रेऽपि विप्रतिपत्त्यप्रतिपत्ती लक्षणं प्रतिज्ञाहान्यादिनिग्रहस्थापनमुक्तं नापशब्द इति।
न चान्यत्रापि क्वचित्प्रमाणशास्त्रे अपशब्दाख्यदूषणं युक्तियुक्तं प्रतिपादितम् तस्मादपशब्दोद्भावनं तदुद्भा
वयितुरेव दोषोद्भावनं नाम निग्रहस्थानं वेदितव्यमिति ॥ अपशब्दनिराकरणं समाप्तम् ॐ शुभम्

॥ ॥ ॥

१

व्याकरण